# Ribhusankathitam Shivena Kumaropadeshavarnanam

# ઋભુસઙ્કથિતં શિવેન કુમારોપદેશવર્ણનમ્

## Document Information

Text title : Ribhusankathitam Shivena Kumaropadeshavarnanam

File name : RRibhusankathitaMshivenakumAropadeshavarNanam.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 5 | 29-57||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુસઙ્કથિતં શિવેન કુમારોપદેશવર્ણનમ્

(કેવલં બ્રહ્મમાત્રત્વાત્)

ઋભુઃ -

કૈલાસે શઙ્કરઃ પુત્રં કદાચિદુપદિષ્ટવાન્ ।

તદેવ તે પ્રવક્ષ્યામિ સાવધાનમનાઃ શ◌ૃણુ ॥ ૫.૨૯॥

- -

અયં પ્રપઞ્ચો નાસ્ત્યેવ નોત્પન્નો ન સ્વતઃ ક્વચિત્ ।

ચિત્રપ્રપઞ્ચ ઇત્યાહુર્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૦॥

ન પ્રપઞ્ચો ન ચિત્તાદિ નાહઙ્કારો ન જીવકઃ ।

કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૧॥

માયકાર્યાદિકં નાસ્તિ માયાકાર્યભયન્નહિ ।

કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૨॥

કર્તા નાસ્તિ ક્રિયા નાસ્તિ કરણં નાસ્તિ પુત્રક ।

કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૩॥

એકં નાસ્તિ દ્વયં નાસ્તિ મન્ત્રતન્ત્રાદિકઞ્ચ ન ।

કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૪॥

શ્રવણં મનનં નાસ્તિ નિદિધ્યાસનવિભ્રમઃ ।

કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૫॥

સમાધિદ્વિવિધં નાસ્તિ માતૃમાનાદિ નાસ્તિ હિ ।

કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૬॥

અજ્ઞાનં ચાપિ નાસ્ત્યેવ અવિવેકકથા ન ચ ।

કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૭॥

અનુબન્ધચતુષ્કઞ્ચ સમ્બન્ધત્રયમેવ ન ।

કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૮॥

ભૂતં ભવિષ્યન્ન ક્વાપિ વર્તમાનં ન વૈ ક્વચિત્ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૩૯॥

ગઙ્ગા ગયા તથા સેતુવ્રતં વા નાન્યદસ્તિ હિ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૪૦॥

ન ભૂમિર્ન જલં વહ્નિર્ન વાયુર્ન ચ ખં ક્વચિત્ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૪૧॥

નૈવ દેવા ન દિક્પાલા ન પિતા ન ગુરુઃ ક્વચિત્ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૫.૪૨॥

ન દૂરં નાન્તિકં નાન્તં ન મધ્યં ન ક્વચિત્ સ્થિતિઃ ।
નાદ્વૈતદ્વૈતસત્યત્વમસત્યં વા ઇદં ન ચ ॥ ૫.૪૩॥

ન મોક્ષોઽસ્તિ ન બન્ધોઽસ્તિ ન વાર્તાવસરોઽસ્તિ હિ ।
ક્વચિદ્વા કિઞ્ચિદેવં વા સદસદ્વા સુખાનિ ચ ॥ ૫.૪૪॥

દ્વન્દ્વં વા તીર્થધર્માદિ આત્માનાત્મેતિ ન ક્વચિત્ ।
ન વૃદ્ધિર્નોદયો મૃત્યુર્ન ગમાગમવિભ્રમઃ ॥ ૫.૪૫॥

ઇહ નાસ્તિ પરં નાસ્તિ ન ગુરુર્ન ચ શિષ્યકઃ ।
સદસન્નાસ્તિ ભૂર્નાસ્તિ કાર્યં નાસ્તિ કૃતં ચ ન ॥ ૫.૪૬॥

જાતિર્નાસ્તિ ગતિર્નાસ્તિ વર્ણો નાસ્તિ ન લૌકિકમ્ ।
શમાદિષટ્કં નાસ્ત્યેવ નિયમો વા યમોઽપિ વા ॥ ૫.૪૭॥

સર્વં મિથ્યેતિ નાસ્ત્યેવ બ્રહ્મ ઇત્યેવ નાસ્તિ હિ ।
ચિદિત્યેવ હિ નાસ્ત્યેવ ચિદહં ભાષણં ન હિ ॥ ૫.૪૮॥

અહમિત્યેવ નાસ્ત્યેવ નિત્યોઽસ્મીતિ ચ ન ક્વચિત્ ।
કેવલં બ્રહ્મમાત્રત્વાન્નાસ્તિ નાસ્ત્યેવ સર્વથા ॥ ૫.૪૯॥

વાચા યદુચ્યતે કિઞ્ચિન્મનસા મનુતે ચ યત્ ।
બુદ્ધ્યા નિશ્ચીયતે યચ્ચ ચિત્તેન જ્ઞાયતે હિ યત્ ॥ ૫.૫૦॥

યોગેન યુજ્યતે યચ્ચ ઇન્દ્રિયાદ્યૈશ્ચ યત્કૃતમ્ ।
જાગ્રત્સ્વપ્નસુષુપ્તિઞ્ચ સ્વપ્નં વા ન તુરીયકમ્ ॥ ૫.૫૧॥

સર્વં નાસ્તીતિ વિજ્ઞેયં યદુપાધિવિનિશ્ચિતમ્ ।
સ્નાનાચ્છુદ્ધિર્ન હિ ક્વાપિ ધ્યાનાચ્શુદ્ધિર્ન હિ ક્વચિત્ ॥ ૫.૫૨॥

ગુણત્રયં નાસ્તિ કિઞ્ચિદ્ગુણત્રયમથાપિ વા ।
એકદ્વિત્વપદં નાસ્તિ ન બહુભ્રમવિભ્રમઃ ॥ ૫.૫૩॥

ભ્રાન્ત્યભ્રાન્તિ ચ નાસ્ત્યેવ કિઞ્ચિન્નાસ્તીતિ નિશ્ચિનુ ।
કેવલં બ્રહ્મમાત્રત્વાન્ન કિઞ્ચિદવશિષ્યતે ॥ ૫.૫૪॥

ઇદં શ‍ૃણોતિ યઃ સમ્યક્સ બ્રહ્મ ભવતિ સ્વયમ્ ॥ ૫.૫૫॥

- -
ઈશ્વરઃ -
વારાશ્યમ્બુનિ બુદ્બુદા ઇવ ઘનાનન્દામ્બુધાવપ્યુમા-
કાન્તેઽનન્તજગદ્ગતં સુરનરં જાતં ચ તિર્યઙ્ મુહુઃ ।
ભૂતં ચાપિ ભવિષ્યતિ પ્રતિભવં માયામયં ચોર્મિજં
સમ્યઙ્ મામનુપશ્યતામનુભવૈર્નાસ્ત્યેવ તેષાં ભવઃ ॥ ૫.૫૬॥

હરં વિજ્ઞાતારં નિખિલતનુકાર્યેષુ કરણં
ન જાનન્તે મોહાદ્ધમિતકરણા અપ્યતિતરામ્ ।
ઉમાનાથાકારં હૃદયદહરાન્તર્ગતસરા-
પયોજાતે ભાસ્વદ્ભવભુજગનાશાણ્ડજવરમ્ ॥ ૫.૫૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુસઙ્કથિતં શિવેન કુમારોપદેશવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૫ । ૨૯-૫૭॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 5 . 29-57..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhusankathitam Shivena Kumaropadeshavarnanam*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*